श्राद्धार्थसार संग्रहः

१५८



नं. २५८६
शब्दार्थसार संग्रहः
[illegible] पत्राणि
[illegible]
लिपि [illegible]

व्याकरण · वर्ण २४

३ प्रा.२. १

ओंश्रीगणेशायनमः विशेष्यविशेषणभावोहि द्विविधः भेदान्वयोऽभेदान्व
यश्च तत्रोभयत्र धर्मितयोपात्तं पदप्रयोगार्हंस्यात्तेषांक्रियादावन्वययोग्यं
विशेष्यम् इतरद्विशेषणम् भेदान्वयोहि ब्राह्मणस्यधनेनग्रामंगच्छती
त्यादौप्रायःषष्ठ्याद्यर्थेप्रयुक्तएव द्वितीयस्तु विरुद्धविभक्तिकानवरुद्धपद
बोध्यः सामानाधिकरण्यरूपः नच त्वतलादिभावप्रत्ययगम्योधर्मोवि
शेषणं नञ्च विकल्पोपाधिगुणादिप्रतिपादितम् तत्तत्प्रकृतेर्विवक्षानुसारे
णावच्छेदकंविधेयंप्रकारश्चेतित्रिधोच्यते त्वादिप्रयोगेतुधर्मिणिषष्ठी
सप्तम्यौ तत्त्वाख्यानेतुयत्तच्छब्दप्रथमाभिः यथाब्राह्मणस्यब्राह्मणे

वागतत्वम् पर्वतस्य पर्वते वा धूमवत्त्वाद्वह्निमत्त्वम् इत्यत्र यो ब्राह्मणत्ववान्स गौ

रः यत्र पर्वतो धूमवांस्ततो वह्निमानिति सामानाधिकरण्येन यद्यस्य परिचाय

कं तत्तस्यावच्छेदकम् व्यावृत्तेर्व्यवहारस्य चोपपादकं परिचायकं जातिसंज्ञागुण

क्रियाद्रव्यादिरूपमवच्छेदकम् यथा कश्चागत इत्यादावागमनानुकूलव्यापा

रैवच्छेदे ब्राह्मणो वाडित्थो वा गौरो वा पाचको वा दण्डी वेत्यादिबोध्यम् तथा

व्यापारानुकू लः च ब्राह्मणत्वावच्छिन्नागमनानुकूलकृतिमानित्यादिबोधः यत्र तादात्म्येन पदा

दिस्तत्र समवायेन घटत्वादिकमिति सामानाधिकरण्यात्पटत्वादेः पटादिप्र

त्यवच्छेदकत्वं देहाद्यचेतननिष्ठगमनादिसाधर्म्यपिण्डामो वेत्येवंरूपस्य चेतनमिति

घटादीनां कपालादेः द्वयोः गुणकर्मणोः तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः =

नित्यसम्बन्धः समवायः

एउत्साहः प्रयत्नः कृतिरित्युच्यते तत्र जातिसंज्ञे त्वनेन पदार्थे नियते एवावच्छे
घ.र. २ दके यथा घटादिपदार्थे घटादिव्याहृतेर्घटादिपदशक्यतायाः कपालादिका
२ र्यत्वादिसर्वव्यवहाराणां चावच्छेदिका घटत्वादिजातिरेव देवदत्तादौ च संज्ञैव
त्वादिबोध्या अत एव तयोः प्रायो विशेष्यतावच्छेदकत्वं व्यवहरंति अत एव
जातिसंज्ञाग्राहकयोरेव सूत्रे घटादिवद्व्रीहिकर्मधारयोः परनिपातप्रयोजके
विशेष्यग्राहकत्वं व्यवहरंति इदानीं घटोस्तीत्यादौ च वृत्तिकानामपि विभूनां
कालादीनां विशेषणतया सामानाधिकरण्येन सत्ताद्यवच्छेदकत्वं प्रसिद्धम्
विशेष्यं बुद्धिप्रमाणाप्रसिद्धं बोधनीयं तयोः पाते विधेयमित्युच्यते विशेष्यं धर्मि २

तदेवविधेयविशेषणापेक्षयान्वयप्रतियोगित्वंचोच्यते सर्वप्रयोगायच्छाह्
हंतदेवंनविधेयम् यथापर्वतोवह्निमानास्लणाग्यागतः त्यादौ सर्वे
प्रयोगेतुविशेष्यमात्रान्वयेनाख्यातनयाद्वह्निमत्वादेस्तातत्वान्नविधेय
त्वे अपेक्षितत्वंचप्रतियोगित्वंनिरूपकत्वंचेतिनार्थान्तरम् तथाचनित्य
सापेक्षाणांपुत्रत्वपितृत्वादीनांनिरूपणीयानांधर्माणांद्यैतैर्निरूपकैः स
हनिरूप्यनिरूपकभावः प्रतियोगीनिरूपकःसप्रतियोगीनिरूप्यएव निरूप्य
धर्माधिकरणमनुयोगि तथाचनिरूप्यधर्मद्वारानुयोगिप्रतियोगिभावसंबं
धोप्यपेक्षारूपःफलितः देवदत्तस्यपुत्रः पुत्रदेवदत्तपुत्रत्वततद्भेतः क्रमेणप्र

तियोगिसम्बन्धितोऽवच्छिन्नप्रतियोगितो भवति । यत्तदात्मरूपितेत्यत्र तु यत्तदात्मरूपितत्व
पा॰र॰ ३ तदाश्रयांशस्य बोध्याः । एवमेव तस्यावच्छेदकत्वेनावच्छेद्यत्वं तत्त्वादावच्छेदक
3 त्वावच्छेद्यत्वजन्यत्वजनकत्वव्याप्यत्वव्यापकत्वाधारत्वाधेयत्वपूर्वत्वपरत्वादौ
निरूपणीयेऽनुयोगिप्रतियोगिनौ स्वयमूह्यौ । यथापूर्वत्रैव ब्राह्मणत्वनिष्ठाऽव
त्या च्छेदकतानिरूपितावच्छेद्यताशालिगमनत्वनिष्ठजन्यतानिरूपितजनकताशा
निष्ठाधेय लिकृतिनिरूपिताधिकरणताशालीपुरुष इति बोधः । पर्वतो वह्निमानित्यत्र
ना वह्नौ विधेये पर्वतत्वमुद्देश्यतावच्छेदकम् । अन्यदादिनां वह्नौ ज्ञाते तत्पर्वतत्वे
विधेयतावच्छेदकम् । तथा च क्रमेण पर्वतत्वनिष्ठावच्छेदकतानिरूपिताव २

धूमाभावे वह्न्यभावो न भवति वह्न्यभावो व्याप्यः धूमाभा
यस्तु वह्न्यभावं विनापि भवति स धूमाभावो व्यापकः =

च्छेद्यताख्यत्वोद्देश्यतानिरूपितवह्निनिष्ठविधेयताकोबोधः पर्वतत्वाव
च्छिन्नविशेष्यतानिरूपितवह्निनिष्ठप्रकारताकोबोधः तथाब्राह्मणत्वावच्छि
न्नोद्देश्यतानिरूपितागतत्वनिष्ठविधेयताकोबोधः एवंडित्थस्यागच्छतीत्या
दावपिबोध्यम् अनुमानेतूपदत्तैवधर्मिता यद्यदविनाभूतंतत्तेनव्याप्यं
द्वितीयंव्यापकम् व्याप्यस्यवचनंपूर्वंव्यापकस्यततःपरम् अभावयोस्त
द्विरुद्धाव्याप्यव्यापकतामता व्याप्यत्वंव्याप्तिरितिनार्थांतरम् यथावह्निनि
रूपितव्याप्यत्वंधूमे धूमनिरूपितव्यापकत्वंवह्नौ तथावह्न्यभावनिरूपित
व्यापकत्वंधूमाभावे धूमाभावनिरूपितव्याप्यत्वंवह्न्यभावइति अन्वयव्यति

यथा धूमोऽग्निं विना न भवति स धूमो व्याप्यः अग्निर्व्यापकः =

प्रा॰र॰
४
५

रेकौहाविमोहेत्संतलाभतः तौमपदविपद्याख्योस्कृदमाख्यतदवयाविति ॥
मातिस्तुयत्रयस्मस्तत्राग्निर्यत्रवन्ह्याभावस्तत्रस्माभावः नन्तुयत्राग्निस्तत्रस
मस्त्याद्यबोधः अनुमानवत्सर्वत्रोद्देश्यविधेयभावोबोध्यः आधारत्वमधि
करणत्वम् आधेयत्वं तद्वृत्तित्वं अभावमेवं थादीनां तु मप्रतियोगित्वमेव
नप्रतियोगित्वम् घटादीनां तु निष्प्रतियोगित्वं जातिवाचकत्वात् विशे
षणविभक्तिः प्रयोगसाधुत्वाय प्रथमाविभक्तेस्तु मेरव्यामात्रमर्थः ब्राह्मण
षष्ठ्याः २
ाणां सायनमित्यादौ स्वत्वाद्यनेकविधउभयपदार्थसंबंधोवाच्यः तथा च ब्रा
ह्मणत्वावच्छिन्ननिरूपितस्वत्ववान्शालिधनमिति बोधः द्वितीयाकर्मत्वम् १
याः

तत्र संयोगविभागत्वादिरूपं क्रियाजन्यं फलमेव क्रिया च धात्वर्थरूपा कर्त्राख्या
तत्तृतीयावाच्यकृतिजन्यो व्यापार एव कर्माख्यातस्य तु प्रत्ययार्थं फलमेव न
कृतिः आख्यातार्थसंख्याकालस्य कृतावन्वयः अयमत्र संग्रहः व्यापारो धा
तुना वाच्यस्तत्फलं तु द्वितीयया कृतिस्तृतीयाख्यातयोर्जनकत्वादिरन्व
यात् १ इत्यादौ तु कृतेर्बाधे व्यापाराश्रये फलस्य तेन तिङर्थसंख्यायोऽन्वीतः प्र
थमान्तो विशिष्यते २ व्यापारमात्रं धात्वर्थः संख्या कालः कृतिस्तथा कर्त्रा
ख्यातस्य वाच्याः स्युः फलं वाच्यं द्वितीयया ३ कर्माख्यातस्य वाच्याः स्युः सं
ख्या कालः फलं तथा कृतिस्तृतीयावाच्यात्र संसर्गो जन्यतादिकम् संख्याया

धा. ३. ५ स्वकृतिफलाश्रयत्वरूपयोः कर्तृकर्मणोरेवान्वयः जन्यत्वाश्रयत्वादिकं न कस्यापि
वाच्यम् किन्तु निरूपितत्वादिवत्संसर्गबललभ्यमेव प्रथमान्तकर्तृकर्मणोरेव
तु विशेष्यत्वं न तस्मात्तयोर्विशेष्यत्वबोधार्थं कर्त्राख्याते तु फलशाहितजनक
परम्पराकर्माख्याते च जन्यपरम्परेति सिद्धम् तथा च ग्रामं गच्छति देवदत्त इत्य
त्रैकर्त्राख्याते एकग्रामनिष्ठसंयोगानुकूलवर्तमानकृतिमानेकदेवदत्त इ
ति बोधः गम्यते ग्रामो देवदत्तेनेत्यत्र कर्माख्याते तु एकदेवदत्तनिष्ठवर्तमा
नकृतिजन्यव्यापारजन्यसंयोगाश्रयोऽल्पैकग्राम इति बोधः वर्तमानत्वं प्रारब्धाप
रिसमाप्तत्वम् लिडादौ भूतत्वं च वर्तमानध्वंसप्रतियोग्युत्पत्तिकत्वम् कृतस्तु ५
भविष्यत्वं विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वम् ।

कर्त्रीयर्योभिधायकत्वात्तद्विशेष्यकोबोधोनाख्यातवत्संख्यया। प्रथमान्तादे
पमपेक्षते देवदत्तेनस्थीयतइत्यत्रभावाख्यातेतुफलादेरभावाद्व्यापारपर्यंतय
वबोधः कृतिसाध्यत्वंसतिमबलवदनिष्टाजनकेष्टसाधनत्वंविध्यर्थः स्वर्ग
कामोयजेतेत्यादौतादृशयागकः स्वर्गकामइतिबोधः आशीर्लिङ्लोटोर्वक्ति
त्वाविषयत्वमर्थः गम्यादित्यादौमदिच्छादिविषयगमनानुकूलकृतिमा
निति बोधः अधिकरणत्वंतुकर्तृकर्मद्वाराव्यापारफलाश्रयत्वम् संप्रदानत्वं
तूद्देश्यत्वम् शेषत्वमितियावत् अपादानत्वंतुविश्लेषजनकक्रियाना
श्रयत्वेसतितद्विश्लेषाश्रयत्वम् करणत्वंतुकर्त्रधिष्ठितत्वेसतिक्रियाजनक

श्रा॰र॰ ६

व्यापारवत्त्वम् कर्त्ता कर्म च करणं संप्रदानं तथैव च अपादानाधिकरणे इत्याहुः

कारकाणि षडिति षष्ठीयोगे षष्ठी प्रथमयोरपि कर्तृकर्मप्रयुक्तत्वम् राज्ञः पु

रुषः इत्यादिसंबन्धे षष्ठयास्तु न कथं चित्कारकपरत्वम् क्रियान्वयित्वमेव कारक

त्वात् सं च ग्रामकर्मकगमनकर्त्ता देवदत्तकर्तृकगमनकर्मत्वं वा बोधः न

घोतदधिकरणकं तरुस्थे षपके इत्यादि बोध्यः तत्संप्रदानकत्वं नाम विप्रादिति

शेषे षपतानिरूपितगवादिस्वत्वविशेषत्वापादकत्वम् तदपादानकत्वं ना

मं तन्निष्ठविभागजनकत्वम् तत्करणकत्वं नाम तन्निष्ठव्यापारजन्यत्वं यत्तु

व्यापारमात्रस्य धात्वर्थत्वात् ग्रामं त्यजति ग्रामं गच्छतीत्यादौ कर्मत्वसंयोगे विभा ६

धात्वर्थतावच्छेदकत्वे सति क्रियाजन्यफलशालित्वं कर्मत्वम् =

गेत्व फलव्याप्तयेपि कलं प्रकल्प्यं द्वितीयापत्ते वारणाय यत्फले धात्वर्थतावच्छेद
कत्वं संयोगविभागयोर्हि निष्ठत्वेन कर्तुरपि कर्मत्वापत्तिवारणाय फलजन
कक्रियायां परसमवेतत्वं च तद्द्वितीयावाच्यमिति नितरां रोचयामः प्रकारता
दि विषयतानां तदवच्छेदकानां चार्थिकापत्तेः अकारणस्यापि कपालत्वा
देः कारणतावच्छेदकत्ववत् कविन्नत्वाश्रयत्वादिरूपाकापातादेरवाच्यस्या
पि वाच्यतावच्छेदकत्वस्वीकारात् ज्ञाने घटादौ विषयता च विशेष्यता प्रकारता
संसर्गिता चेति नितरां हि विषयाकारप्रतीतिसिद्धस्वरूपसंबंधरूपा त्रिधैव अत
एवं तस्याः सन्निहितासन्निहितविषयसाधारणमेवं सर्वत्र स्वरूपसंबंधम

जान्याजात्यवच्छिन्नवद्दनिष्ठप्रकारताविषयतानवच्छिन्नरूपितसांसर्गिकविषयतावच्छिन्न

नीतेरविशेषात् नीलोघटइत्यत्रनीलाभिन्नोघटइतिशाब्दबोधेनीलत्वजात्यवच्छि

न्ननीलगुणनिष्ठप्रकारताविषयतानिरूपितसमवायरूपसांसर्गिकविषयता

वच्छिन्नविशेष्यताशालिनिरूपिताभेदरूपसांसर्गिकविषयतानिरूपितघटत्वा

वच्छिन्नविशेष्यताशालीतिविषयताबोधः नीलगुणाश्रयीतिनीलत्वजातिनि

ष्ठावच्छेदकतानिरूपितेतिसमवायात्मकेतिचैवंवासर्वत्रवाच्यम् ब्राह्मण

निरूपितस्वत्वशालिधनमितिबोधेब्राह्मणत्वावच्छिन्नब्राह्मणनिष्ठप्रकारता

विषयतानिरूपितनिरूपितत्वरूपभेदसांसर्गिकविषयतावच्छिन्नसंबंधत्वा

वच्छिन्नविशेष्यताविषयताभिन्नस्वत्वनिष्ठप्रकारताविषयतानिरूपिताश्रय

तानिरूपसांसर्गिकविषयतावच्छिन्नधनत्वावच्छिन्नविशेष्यताशालीतिविषयता
बोधः एकग्रामनिष्ठसंयोगानुकूलगमनानुकूलवर्त्तमानकृतिमानितिशाब्द
बोधे एकत्वावच्छिन्नैकत्वनिष्ठप्रकारतानिरूपितसमवायात्मकसांसर्गिकवि
षयतावच्छिन्नग्रामत्वावच्छिन्नविशेष्यताभिन्नग्रामनिष्ठप्रकारताविषयता
निरूपिताश्रितत्वरूपभेदसांसर्गिकविषयतावच्छिन्नफलत्वावच्छिन्नविशे
ष्यताभिन्नसंयोगनिष्ठप्रकारतानिरूपितजनकतात्मकभेदसांसर्गिकवि
षयतावच्छिन्नगमनत्वावच्छिन्नविशेष्यताविषयताभिन्नगमननिष्ठप्रकारता
विषयतानिरूपितानुकूलतात्मकभेदसांसर्गिकविषयतावच्छिन्नवर्त्तमानकाल

व्यापारत्वावच्छिन्नविशेष्यताविषयताभिन्न
व्यापारनिष्ठप्रकारताविषयतानिरूपितानुकूलता
त्मकभेदसांसर्गिकविषयतावच्छिन्न ५२

श्रा.र.
८

त्वावच्छिन्नप्रकारतानिरूपिताधेयतात्मकभेदसांसर्गिकविषयतावच्छिन्नकृ
तित्वावच्छिन्नविशेष्यताभिन्नं कृतिनिष्ठप्रकारतानिरूपिताश्रयतात्मकभेद
संसर्गावच्छिन्नैकत्वनिष्ठप्रकारतानिरूपितसमवायावच्छिन्नदेवदत्तत्वाश्रय
तत्वावच्छिन्नविशेष्यताशालीति बोधः। देवदत्तेन गम्यते ग्राम इत्यत्र एक
त्वत्वावच्छिन्नैकत्वनिष्ठप्रकारतानिरूपितसमवायात्मकसांसर्गिकविष
यतावच्छिन्नं देवदत्तत्वावच्छिन्नविशेष्यताभिन्नप्रकारतानिरूपिताश्रितत्व
रूपभेदसांसर्गिकविषयतावच्छिन्नवर्तमानकालत्वावच्छिन्नप्रकारतानि
रूपिताधेयतात्मकभेदसांसर्गिकविषयतावच्छिन्नकृतित्वावच्छिन्नवि ८

शेष्यताभिन्नप्रकारतानिरूपितजन्यत्वात्मकसांसर्गिकविषयतावच्छिन्नग

श०र० ५ मनत्वावच्छिन्नविशेष्यतेत्यादिपूर्वेक्तन्यायेन सर्वं स्वयमेवोहनीयम् ॥ शब्द

शास्त्रैकहृतितिर्थान्वयांतर्भूतैकथान्वयेविशेष्यकंएवंवोध्यः एकग्रा

मकमेकमेवदेवदत्तकर्तृकंगमनमित्येवं सर्वत्रोहनीयम् ॥ इति

शब्दार्थसारसंग्रहः ॥ गमनत्वावच्छिन्नविशेष्यताभिन्नप्रकारतानि

रूपितजन्यत्वात्मकभेदसंसर्गावच्छिन्नसंयोगत्वावच्छिन्नविशेष्यताभि

न्नप्रकारतानिरूपिताश्रयत्वात्मकभेदसांसर्गिकविषयतावच्छिन्नग्रा

मत्वावच्छिन्नविशेष्यताशालीति ॥ श्रीः ॥ ॐ नमो नारायणाय ॥ ५ ५

